PAPER - 2

# MT

2017 .... .... 1100

Seat No. | | | | | | | |

**MT - SANSKRIT ENTIRE (SECOND OR THIRD LANGUAGE) - SEMI PRELIM - I PAPER - II**

**Time : 3 Hours** **(Pages 10)** **Marks : 80**

## ✶ प्रथमः विभागः - गद्यम् ।

**प्र.१. अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

अदितिः आचार्यायाः दर्शनार्थम् आगता, यतः .........

(सा राज्यनाट्यस्पर्धायाः कृते आचार्यां निमन्त्रयितुम् ऐच्छत् । / सा तस्याः मनसि उत्पन्नां नाट्यविषयिणीं जिज्ञासां पूरयितुम् ऐच्छत् ।)

II) पूर्णवाक्येन उत्तरत । १

केन नाट्यशास्त्रं विरचितम् ?

III) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यं लिखत । १

अदितेः नाटकं रौद्ररसप्रधानं वर्तते ।

(अभिनयं कर्तुमुत्सुका छात्रा अध्यापिकां प्रति गत्वा पृच्छति ।)

अदितिः - आचार्ये नमो नमः । नाट्यविषयिणी जिज्ञासा भवत्याः दर्शनार्थं मां प्रेरयति।

आचार्या - किं कारणं ते जिज्ञासायाः?

अदितिः - अस्माकं शालया राज्यनाट्यस्पर्धायाः कृते संस्कृतनाट्यस्य प्रयोगः करणीयः इति सुनिश्चितम् । झाशीराज्ञी मया अभिनेतव्या लक्ष्मीबाई । वीररसप्रधानमेतन्नाटकमिति दिग्दर्शकेन कथितम् । भरतमुनिविरचितं नाट्यशास्त्रं नाट्यरसान् च भवती जानाति । अतः तद्विषये प्रष्टुमहमागता ।

आचार्या - श्रुणु । प्रायः ख्रिस्तपूर्वं तृतीयशतके भरतमुनिना नाट्यशास्त्रं विरचितम् । एतन्नाट्यशास्त्रं नाम पञ्चमो वेद इति मन्यते बुधैः । तस्मिन् ग्रन्थे नाट्योपयुक्तानां रसानां विषये तेषां भावविषयेऽपि मुनिना कथितमस्ति ।

अदितिः - के नाम रसाः भावाश्च ? नाट्येषु रसाभिव्यक्तिः कथं संभवति ?

आचार्या - भरतमुनिः कथयति यथा महानसे षड्रसैर्युक्तं समुचितपाकक्रियाभिः सिद्धं भोजनमास्वाद्यं भवति, नाट्ये तथैव विविधभावैर्युक्ता अभिनयसहिता कलाकृतिः रसिकजनानां कृते आस्वादनीया मनोहारिणी च भवति । तस्मादेते विशेषभावाः नाट्यरसाः इति व्याख्याताः ।

अदितिः - कति रसाः ? कानि च तेषां नामानि ?

आचार्या - शृङ्गारहास्यरौद्रकरुणवीराद्भुतबीभत्सभयानकाः तथैव शान्त इति नवरसाः ख्याताः। अस्मिन् शास्त्रे सर्वरसानां देवताः वर्णाश्च वर्णिताः ।

**२. शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) सन्धिविग्रहं कुरुत । १

i) भावाश्च - .............. + .............. ।
(भावा + श्च । / भावः + च । / भावाः + च ।)

ii) एतन्नाट्यशास्त्रम् - .............. + .............. ।
(एतत् + नाट्यशास्त्रम्। / एतन्न + नाट्यशास्त्रम्। / एत + नाट्यशास्त्रम्।)

II) समूहेतरपदं चित्वा लिखत । १

i) महानसः, पाकशाला, पाठशाला, पाकगृहम् - ..............

ii) शिक्षा, शिक्षिका, आचार्या, अध्यापिका - ..............

III) गद्यांशे आगते विशेषणे चित्वा रिक्तस्थाने पूरयत । १

विविधभावैर्युक्ता

[ ] — कलाकृतिः — [ ]

अभिनयसहिता

IV) गद्यांशे आगते हेत्वर्थक - धातुसाधित - तुमन्त - अव्यये .......... , .......... । १

**३. स्वमतप्रकटनम् ।** २

'नाट्ये विविधभावैः युक्तः अभिनयः आवश्यकः अस्ति वा नास्ति' एतद्विषये भवतः मतं माध्यमभाषया लिखत ।

**ब) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) बालः नरेन्द्रः मार्गाद् दूरं गन्तुं प्रायतत, यतः ............. १
(सः आश्चर्यचकितः । / सः स्वसंरक्षणं कर्तुमैच्छत् ।)

II) कः कं वदति । १
''विरम शोकात् ।''

III) वाक्यं पुनर्लिखित्वा योग्यं वा अयोग्यमिति लिखत । १
दुर्गापूजनं नाम केवलं मूर्तिपूजनम् ।

एकदा मात्रादिष्ट दुर्गादेव्याः मूर्तिं क्रीत्वा स गृहमागच्छत् । दुर्गापूजामहोत्सवं नाम शक्तिपूजनमिति स जानाति स्म । गृहं निवर्तमानः सः शक्तेः स्वरूपचिन्तने मग्नोऽभवत् । अकस्मात् तस्य विचारमाला खण्डिता तुरगपदानां रवेण । तेन दृष्टं यत् मण्डलाधिकारिणः अश्वयानं मार्गे वेगेन धावति इति । स्वसंरक्षणाय स मार्गाद् दूरं गन्तुं प्रायतत । सहसा तेन दृष्टं यत् काचन बालिका मार्गे खेलने मग्नास्ति । सा अश्वयानागमनविषये न जानाति । सवेगम् अश्वयानं

तस्याः कृते यमयानमेव । तद्विलोक्य नरेन्द्रस्य हस्ताद् मूर्तिः पतिता । तेन धावित्वा झटिति सा बालिका अश्वमार्गाद् दूरीकृता तस्याः मात्रे च प्रदत्ता । तस्याः मात्रा अश्रुपूर्णनयनाभ्यां तस्मै आशीर्वचनं दत्तम् । यदा स गृहमागतः तदा तेन ज्ञातं यत् तस्य हस्तात् च्युता मूर्तिः तत्रैव मार्गे भग्ना वर्तते । आत्मानमपराधिनं मत्वा स मात्रे सर्वमकथयत् । तदा मात्रोक्तं ''वत्स नरेन्द्र, विरम शोकात्। यद्यपि त्वया मूर्तेः पूजा न कृता तथापि बालिकायाः साहाय्यं कृत्वा, बालिकारूपशक्तिदेवतायाः एव पूजनं कृतम्।'' धन्या सा माता धन्यश्च बालनरेन्द्रः।

**२. शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) पूर्वपदं लिखत । १

i) भग्नास्ति = ....... + ....... ।

ii) मात्रोक्तम् = ....... + ....... ।

II) समूहेतरपदं चित्वा लिखत । १

i) कर्णः, ध्वनिः, रवः - ....... ।

ii) विचारः, विहारः, चिन्तनम् - ....... ।

**III) चतुर्थपदे योग्यं विशेषणं लिखत ।** १

i) बालनरेन्द्रः : धन्यः :: माता : ....... ।

ii) बालिका : भग्ना :: विचारमाला : ....... ।

IV) गद्यांशे आगते २ पूर्वकालवाचक - धातुसाधित- त्वान्त - अव्यये ........ , ........ । १

**३. पृथक्करणम् ।**

यथाक्रमं घटनाः लिखत । २

i) नरेन्द्रः मार्गाद् बालिकां दूरीकरोति ।

ii) माता नरेन्द्रं सान्त्वयति ।

iii) नरेन्द्रः दुर्गादेव्याः मूर्तिं क्रीणाति ।

iv) मार्गे अश्वयानं सवेगम् आगच्छति ।

**क) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत। १

i) ........ सङ्गणकोऽन्तर्जालं वा गृहे गृहे विद्यतेऽस्माकम् । (अधुना / पुरा ।)

ii) प्रागैतिहासिककालतो विविधेषु संशोधनेषु अन्तर्जालमिति सर्वश्रेष्ठाविष्कारो ........ । (प्राणिनः / मनुजस्य ।)

II) पूर्णवाक्येन उत्तरं लिखत । १

किं नाम अन्तर्जालम्?

III) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

'मोडेम्' नाम एकं सहायकं बृहदुपकरणमस्ति ।

'परिवर्तिनि संसारे किं किं न परिवर्तते इति न्यायेन एकविंशतितमे शतके साक्षरताऽपि एवं व्याख्यायते - यः सङ्गणकविषयेऽन्तर्जालविषये चानभिज्ञः स साक्षरोऽपि निरक्षर एव मन्यते। अधुना सङ्गणकोऽन्तर्जालं वा गृहे गृहे विद्यतेऽस्माकम् । तथा विद्यालयेष्वपि अध्ययनाध्यापनार्थं प्रयुज्यतेऽस्माभिः । प्रागैतिहासिककालतो विविधेषु संशोधनेषु अन्तर्जालमिति सर्वश्रेष्ठाविष्कारो मानवस्य । अद्ययावन्महाक्रान्तिरेषा । 'मोडेम्' नाम एकं सहायकं लघूपकरणमस्ति । तद् दूरसञ्चारतन्तुभिः सङ्गणकं संयोज्य अन्तर्जालस्य संरचना भवति। सङ्गणकानां लघुगुरुजालकानां मिथः सम्बन्धेन विश्वव्यापि यज्जालं भवति, तदेव सङ्गणकजालान्तरिक्षं खलु (Cyberspace)। अन्तर्जालमिति ज्ञानप्राप्तेरतिद्रुतगतिमार्ग एव (Information Super Highway) । अन्तर्जालं नाम विश्वव्यापिजालं (www) संज्ञापनतन्त्रज्ञानस्य महाजालं वा । जनानां जनहितार्थं जनैर्निर्मितमिदं गणतन्त्रमेव । अहो बत, नापेक्षतेऽ स्यापरिमितज्ञानार्जनस्य कृते नाणकमेकमपि । यथा प्राचीनकाले कल्पवृक्षस्तथाऽर्वाचीनकाले अन्तर्जालमेव ज्ञानकल्पवृक्षः। निमिषमात्रेणैव मनोवाञ्छितं ज्ञानलालसा वा सम्पूर्यतेऽनेन । नानाशास्त्रकलानां ज्ञानं, वैश्विकवार्ताः, विविधसंस्थानां विभागानां च संज्ञापनं, सहस्रशः ग्रन्थाः, पर्यटनार्थमुपयुक्त-ज्ञानमासनारक्षणं च, दूरस्थानां दर्शनं तैश्च सह संभाषणं, सामान्यज्ञानं चेति समुपलभ्यतेऽनेन तन्त्रज्ञानेन । एष आधुनिकः कल्पवृक्षःअस्मभ्यं /अस्मासु सर्वविधं संज्ञापनं वितरति ।

२. **शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) पूर्वपदं लिखत । १

i) यज्जालम् = .......... + जालम् ।

ii) विद्यालयेष्वपि = .......... + अपि ।

II) विलोमपदानां मेलनं कुरुत । १

| | अ | ब |
|---|---|---|
| (1) | निरक्षरः | गुरुः । |
| (2) | लघुः | अनभिज्ञः । |
| | | साक्षरः । |

III) गद्यांशे आगते विशेषणे चित्वा लिखत । १

i) .......... कल्पवृक्षः ।

ii) .......... संसारे ।

IV) गद्यांशे आगते २ तृतीयान्तपदे ............., ............. । १

३. **पृथक्करणम् ।** २

गद्यांशतः उचितान् शब्दान् चित्वा जालरेखाचित्रं पूरयत ।




**★ द्वितीयः विभागः - पद्यम् ।**

**प्र.२. अ) पद्यांशान् पठित्वा निर्दिष्टे कृती कुरुत ।**

१. **पृथक्करणम् ।** २

जालरेखाचित्रं पूरयत ।




रागे द्वेषे च माने च द्रोहे पापे च कर्मणि ।
अप्रिये चैव कर्तव्ये चिरकारी प्रशस्यते ।।१।।
मित्रं प्रीतिरसायनं नयनयोरानन्दनं चेतसः
पात्रं यत् सुखदुःखयोः सह भवे न्मित्रेण तद्दुर्लभम् ।
ये चान्ये सुहृदः समृद्धिसमये द्रव्याभिलाषाकुला -
स्ते सर्वत्र मिलन्ति तत्त्वनिकषग्रावा तु तेषां विपत् ।।२।।

२. **स्पष्टीकरणम् ।** २

'तत्त्वनिकषग्रावा तु तेषां विपत्' इति कल्पनायाः स्पष्टीकरणं माध्यमभाषया लिखत ।

**प्र.२. ब) पद्यांशान् पठित्वा निर्दिष्टे कृती कुरुत ।**

१. **शब्दज्ञानम् ।**

I) मञ्जूषातः योग्यं पर्यायं शब्दं चित्वा लिखत । (नेत्रम्, आननम्, तारका, शशी) १

i) वक्त्रम् = .............. । ii) चन्द्रः = ............. ।

II) पद्यांशे आगते केऽपि द्वे विशेषणे चित्वा लिखत । १

....... , ....... ईश्वरम् ।

अङ्गेन गात्रं नयनेन वक्त्रं न्यायेन राज्यं लवणेन भोज्यम् ।
धर्मेण हीनं खलु जीवितञ्च चन्द्रं विना भाति तथा न रात्रिः ।।१।।
अव्यक्तं व्यापकं नित्यं गुणातीतं चिदात्मकम् ।
व्यक्तस्य कारणं वन्दे व्यक्ताव्यक्तं तमीश्वरम् ।।२।।
तन्मूलं गुरुतायास्तत्सौख्यं तद्यशस्तदौर्जित्यम् ।
तत्सौभाग्यं पुंसां यदेतदप्रार्थनं नाम ।।३।।

**२. अन्वयपूर्तिः ।** २

एतत् यत् ........ नाम, तत् ........ मूलं, तत् सौख्यं, तत् ........, तत् और्जित्यं, तत् ........ सौभाग्यम् ।

**क) द्वे सुभाषिते शुद्धे पूर्णे च लिखत ।** ४

i) दुःखिताः .............. सुकृतपादपाः।।

ii) यथा ..............ऽवितरेतरम् ।।

iii) धृतिः .............. श्रियः ।।

**ड) वृत्तनाम चिनुत ।** १

समुपागतवति दैवादवहेलां कुटज मधुकरे मा गाः।
मकरन्दतुन्दिलानामरविन्दानामयं महामान्यः ।।

अस्य श्लोकस्य वृत्तनाम ......... इति । ( इन्द्रवज्रा / गीतिः / उपेन्द्रवज्रा)

## ✶ तृतीयः विभागः - स्थूलवाचनम् ।

**प्र.३. अ) गद्यांशं पठित्वा निर्दिष्टे कृती कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यं लिखत । १

दलितमहासङ्घस्य कार्यसभायां भीमरायः आङ्ग्लवाग्विषयं प्रस्तावोपन्यासं कृतवान् ।

II) एकपदेन उत्तरं लिखत । १

संस्कृता वाक् कस्याः मूलम् ?

लब्धे च स्वातन्त्र्ये नेहरुणा मन्त्रिमण्डलं रचितम् ।
विधिमन्त्रिपदे धीमान् नियोजितः श्रीभीमरायः ।।१।।
घटनासमितिप्रमुखो बभार भव्यां नवां धुरं भीमः ।
श्रमभारं नागणयन्नित्यं निरतोऽपि निजकार्ये ।।२।।

प्रियसंस्कृतवाग्भीमः कामं जानन् विबुधवाङ्महत्ताम् ।
ऐच्छत् तां स्थापयितुं हिन्दीव राष्ट्रवाचः पदे ।।३।।
दलितमहासङ्घस्य च कार्यसभायां तदा भीमरायः ।
प्रस्तावोपन्यासं कृतवान् गीर्वाणवाग्विषयम् ।।४।।
संस्कृतवाङ्माहात्म्यं विशदीकुर्वंस्तदा भीमरायः ।
प्रोवाच संस्कृता वाक् भारतीयसंस्कृतेर्मूलम् ।।५।।
नैकगिरां प्रसवित्री भिन्नप्रान्तीयभारतीयानाम् ।
मान्या सदैव विदुषाम् अर्हति नो राष्ट्रभाषात्वम् ।।६।।
कैश्चित्सांसदमुख्यैः संस्कृतवाग् भवतु राष्ट्रभाषेति ।
प्रस्ताव उपन्यस्तो भीमस्तेषामभूत् प्रमुखः ।।७।।
मैत्रोपनाम विद्वाञ् ज्ञातुं भीमस्य संस्कृतज्ञानम् ।
पप्रच्छ भीमरायं संस्कृतवाण्यैव निजशङ्काः ।।८।।

२. **पृथक्करणम् ।** २

पद्यांशं पठित्वा जालरेखाचित्रं पूरयत ।

भीमरायः
- ....... पदे नियुक्तः ।
- ....... प्रमुखः ।
- ....... भाषाप्रवीणः ।
- निजकार्ये ....... ।

## ✶ चतुर्थः विभागः - लेखनकौशल्यम् ।

**प्र.४. यथानिर्देशं कृतीः कुरुत । (केवलं ३ उपप्रश्नाः लेखनीयाः ।)**

अ) **परिच्छेदपूर्तिः ।**

मञ्जूषातः उचितशब्दान् चित्वा परिच्छेदं पुनर्लिखत । ५

यथा शरत्पूर्णिमा प्रकाशेन विशिष्यते सर्वासु रात्रिषु तथैव कार्तिकमासस्य अमावस्या ....... विशिष्यते सर्वासु रजनीषु । अस्यां रात्रौ स्वर्गायते खलु भूलोकः । स्थाने स्थाने प्रज्वालिताः दीपाः ....... । श्रूयते यदस्मिन् दिने पुरा श्रीरामचन्द्रः रावणं ....... अयोध्यावासिभिः गृहाणि रथ्याः ....... च परिमार्जिताः । पताकाभिः तोरणैः अलङ्कृताः। एषः हर्षोत्सवः अनेन रूपेण एव रूढः सञ्जातः । लक्ष्मीपूजा इति अपरः विशेषः अस्य दिवसस्य । अस्मिन्नेव दिने बलिना बन्दीकृता लक्ष्मीः भगवता ....... । अतः एव अस्मिन् दिने लक्ष्मीपूजनं क्रियते येन मुक्ता लक्ष्मी अस्माकं गृहम् आगच्छेत् ।

(राजमार्गाः, तिमिरेण, मोचिता, हत्वा, विलसन्ति)

**ब) ३ पर्यायेषु १ विषयम् अधिकृत्य पञ्चवाक्यात्मकं निबन्धं लिखत ।** ५

१. ग्रीष्मवर्णनम् । २. सङ्गणकः । ३. गणेशोत्सवः।

**क) संस्कृतानुवादः ।**

८ वाक्येषु ५ वाक्यानां संस्कृतभाषया अनुवादं कुरुत । ५

i) An elephant walks very slowly.
ii) The birds fly in the sky.
iii) Have you read that news?
iv) I saw a tiger in the dense forest.
v) If I will go to Kashi, I will bring many books of Sanskrit.
vi) When will the programme start?
vii) The birds build the nests on the branches of trees.
viii) The kids dance happily.

**ड) वाक्यरचना ।**

i) धातूनां प्रयोगः - ४ धातुषु ३ धातून् प्रयुज्य ३ वाक्यानि संस्कृतभाषया लिखत । ३

१. धातु याच् (१ आ.प.) २. धातु रुच् (१ आ.प.)
३. धातु वि + रम् (१ प.प.) ४. धातु स्निह् (४ प.प.)

ii) अशुद्धिसंशोधनम् - अव्ययानि प्रयुज्य रचितेषु ४ वाक्येषु २ वाक्ययोः अशुद्धिसंशोधनं कुरुत । २

१. नद्याः अभितः पाषाणाः सन्ति ।
२. सीता गायनेन प्रवीणा ।
३. कृष्णः कंसम् अलम् ।
४. पाठशालां बहिः विशालम् उद्यानं वर्तते ।

**✶ पञ्चमः विभागः - व्याकरणम् - उपयोजनकौशल्यम् ।**

**प्र.५. यथानिर्देशं कृतीः कुरुत । (केवलं ५ उपप्रश्नाः लेखनीयाः ।)**

**अ) क्रियापदरूपैः आवलिपूरणम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

**तृतीयपुरुष-एकवचनस्य रूपाणि लेखनीयानि ।**

| धातुः | आज्ञार्थः | वर्तमानकालः | परोक्षः भूतकालः | विध्यर्थः | द्वितीयः भविष्यकालः | प्रथमः भूतकालः |
|---|---|---|---|---|---|---|
| वच्(२प.प.) | ...... | वक्ति | ...... | ब्रूयात् | ...... | ...... |
| क्री(९आ.प) | क्रीणीताम् | ...... | ...... | ...... | क्रेष्यते | ...... |

**ब) नाम-सर्वनामरूपैः आवलिपूरणम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| तृतीया | ...... | स्वामिभ्याम् | ...... |
| षष्ठी | ...... | ...... | देवीनाम् |
| प्रथमा | अन्या | ...... | ...... |
| पञ्चमी | ...... | युवयोः - वाम् | ...... |

**क) धातुसाधित-विशेषणैः कोष्ठकपूर्तिं कुरुत । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| कर्मणि भूतकालवाचक-धातुसाधित-विशेषणम् | कर्तरि भूतकालवाचक-धातुसाधित-विशेषणम् | कर्मणि विध्यर्थक-धातुसाधित-विशेषणम् | कर्तरि वर्तमानकालवाचक-धातुसाधित-विशेषणम् |
|---|---|---|---|
| | | | |

(कर्तव्या, कथितः, भोज्यम्, आगच्छन्तः, गतवन्तः, दूरीकृता, विचरन, आनीतवती)

**ड) समासाः ।**

**विग्रहवाक्यानां समासनामभिः सह मेलनम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| | अ | ब |
|---|---|---|
| i) | वीरः रसः । | इतरेतर द्वन्द्व समास |
| ii) | विशेषेण सह । | उपपद तत्पुरुष समास |
| iii) | अध्ययनं च अध्यापनं च । | बहुव्रीहि समास |
| iv) | सुष्ठु निश्चितम् । | प्रादि तत्पुरुष समास |
| v) | दुःखं करोति इति । | कर्मधारय समास |
| vi) | दर्शनाय इदम् । | नञ् तत्पुरुष समास |
| vii) | रक्तः पक्षः यस्य सः । | चतुर्थी तत्पुरुष समास |
| viii) | न अभिज्ञः । | अव्ययीभाव समास |

**इ) वाक्यपरिवर्तनम् । (४ पर्यायेषु ३ पर्यायाः लेखनीयाः ।)** ३

i) सारङ्गागाराणि खगैः अङ्गीकृतानि। (खगैः इति पदस्थाने खगाः इति पदं योजयत ।)

ii) भवान् एतान् षड् वैद्यान् प्रति अवधानं दत्त्वा आनन्दमनुभवतु । (अनुभवतु इति पदस्थाने 'अनुभव' योजयत ।)

iii) गृहे आगते तेन ज्ञातम् । (सतिसप्तमीरचनां निष्कासयत ।)

vi) लेरसिया रात्रिमयापयत् । (प्रयोजकं निष्कासयत ।)

फ) **सङ्ख्यावाचकाः । (रिक्तस्थानपूर्तिः ।) (४ पर्यायेषु ३ पर्यायाः लेखनीयाः ।)** ३

i) ......... एताः समिधः श्रियः । (7)

ii) जनाः एतेषु .......... वैद्युषु नावधानं ददाति । (6)

iii) नाट्यशास्त्रं नाम .......... वेदः । (5th)

iv) मया .......... अपि विदेशयात्रा न कृता । (once)

**✶ षष्ठः विभागः - अनुवादकौशल्यम् ।**

**प्र.६. अ) संस्कृतगद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

चितोडस्य नृपः वीरवरः महाराणा प्रतापः बाल्यात्प्रभृति निर्भीकः उदारश्च आसीत्। राजनि भूते सति स प्रतिज्ञाम् अकरोत्, ''तावदहं सुखानि न सेविष्ये यावद् मम देशः स्वतन्त्रः न भवति। परेषाम् ऐश्वर्येण सुखसाधनैः स न कदापि संमोहितः। तस्य मनः नित्यं स्वातन्त्र्यप्राप्तेः विचारैः व्यापृतमासीत् । युद्धभूमौ मृत्युसमयेऽपि स देशस्य स्वाधीनताम् चिन्तयति स्म। मनसा स्मरामः तं महान्तं देशभक्तम्।

**ब) संस्कृतपद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

मूलं भुजङ्गैः शिखरं प्लवङ्गैः शाखा विहङ्गैः कुसुमानि भृङ्गैः ।
नास्त्येव तच्चन्दनपादपस्य यन्नाश्रितं सत्वभरैः समन्तात् ।।

**क) संस्कृतनाट्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

| | | |
|---|---|---|
| भीमः | – | आर्य, मुञ्चतु मां क्षणमेकं भवान्। |
| युधिष्ठिरः | – | किमपरमवशिष्टम्? |
| भीमः | – | आर्य, सुमहदवशिष्टम्। संयच्छामि तावदनेन दुर्योधनदुःशासनरुधिरोक्षितेन पाणिना पाञ्चाल्या दुःशासनावकृष्टं केशहस्तम्। |
| युधिष्ठिरः | – | सत्वरं गच्छतु भवान्। अनुभवतु तपस्विनी वेणीसंहारमहोत्सवम्। |
| भीमः | – | भवति पाञ्चालराजकन्ये दिष्ट्या वर्धसे रिपुकुलक्षयेण। |

**Best of Luck**